## ये चाभावकर्मणोः । (१६८/११५४)

यकारादौ [1]च तद्धिते[2] अभावकर्मणोरर्थयोः अन् प्रकृत्या भवति । सामसु साधुः सामन्यः । [3]वेमन्यः अभावकर्मणोः इति किम् ? राज्ञो भावः कर्म वा राज्यम् । राजन् इति पुरोहितादिषु (५. १. १२८/१७९३) पठ्यते, ततोऽयं यक्प्रत्ययः ॥

## आत्माध्वानौ खे । (१६९/१६७१)

आत्मन् अध्वन् इत्येतौ[4] खे परतः प्रकृत्या भवतः । [5]आत्मने हितः आत्मनीनः । अध्वानमलङ्गामी अध्वनीनः । खे इति किम् ? प्रत्यात्मम् । प्राध्वम् । प्रत्यात्मम् इति अव्ययीभावे 'अनश्च' (५.४.१०८/६७८) इति समासान्तः टच्प्रत्ययः । प्राध्वम् इति 'उपसर्गादध्वनः' (५.४.८५/९५३) इति अच्प्रत्ययः ॥

## न मपूर्वोऽपत्येऽवर्मणः । (१७०/११५७)

मपूर्वः अन् अवर्मणोऽणि परतोऽपत्येऽर्थे न प्रकृत्या भवति । [6]सुषाम्णोऽपत्यं सौषामः । [7]चान्द्रसामः । मपूर्वः इति किम् ? [8]सौत्वनः । अपत्ये इति किम् ? चर्मणा परिवृतो रथः चार्मणः । अवर्मणः इति किम् ? चक्रवर्मणोऽपत्यं चाक्रवर्मणः ।

[८१५] मपूर्वप्रतिषेधे वा हितनाम्न इति वक्तव्यम् । (म.भा. ३.२३३)

हितनाम्नोऽपत्यं हैतनामः, हैतनामनः ॥

## ब्राह्मोऽजातौ । (१७१/११५८)

योगविभागो[9]ऽत्र क्रियते । ब्राह्मः इत्येतदपत्याधिकारेऽपि सामर्थ्यादपत्यादन्यत्रापि [10]टिलोपार्थं निपात्यते । [11]ब्राह्मो गर्भः । [12]ब्राह्ममस्त्रम् । ब्राह्मं हविः[13] । ततः अजातौ । अपत्ये इत्येव । अपत्ये जातावपि [14]ब्रह्मणष्टिलोपो न भवति । ब्रह्मणोऽपत्यं ब्राह्मणः । अपत्ये इत्येव, ब्राह्मी ओषधिः ॥

## कार्मस्ताच्छील्ये । (१७२/१६१३)

कार्मः इति ताच्छील्ये टिलोपो निपात्यते । कर्मशीलः कार्मः । '[15]शीलम्', 'छत्रादिभ्यो णः' (४. ४. ६१, ६२/१६११, १६१२) इति णप्रत्ययः । [16]यद्येवं किमर्थमिदम्, 'नस्तद्धिते' (६. ४. १४४/६७९) इत्येव टिलोपः सिद्धः ? [17]सत्यमेतत् । ज्ञापकार्थं तु[18] । एतज् ज्ञापयति ताच्छीलिके [19]णेऽण्कृतानि [20]भवन्ति इति । तेन चौरी, तापसी इति णान्तादपि ईकारः सिद्धो भवति । ताच्छील्ये इति किम् ? कर्मणः इदं कार्मणम् ॥

---

1. च नास्ति फ. 2. परतः इत्यधिकम् फ. 3. ब्राह्मण्यः अ. 4. शब्दौ इत्यधिकम् फ. 5. आत्मने हितम् आत्मनीनम् । अध्वनीनम् फ. 6. सुषमणः क. 7. माद्रसामः ह. 8. सौत्वमनम् क. 9. अत्र नास्ति फ. 10. टेर्लोपार्थम् क.इ. 11. ब्राह्मो मन्त्रः फ. 12. ब्राह्मं वस्त्रम् ड.फ.क. 13. ब्राह्मी ओषधिः इत्यधिकम् फ. 14. ब्रह्मन् इत्यस्य फ. 15. शीलम् नास्ति ह. 16. यद्येवं नास्ति फ. 17. सत्यमेवैतत् ह. 18. तु नास्ति फ. 19. णेऽप्यणि ब.क. 20. कार्याणि इत्यधिकम् ह.ड.